International Journal of Applied Research 2015; 1(7): 253-255



International Journal of Applied Research

**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2015; 1(7): 253-255
www.allresearchjournal.com
Received: 15-04-2015
Accepted: 17-05-2015

**विश्वजित् राज**
शोधरतः (वर्द्धमान विश्वविद्यालयः)
सहशिक्षकः (गयेश्वरी पि वि विद्यानिकेतन; मालदा; पः वः)

**Correspondence:**
**विश्वजित् राज**
शोधरतः ;वर्द्धमान विश्वविद्यालयःद्ध
सहशिक्षकः ;गयेश्वरी पि वि विद्यानिकेतन; मालदा; पः वः

# सुखप्राप्तिः दुःखनिवृत्तिश्च – चार्वाक–बौद्धतत्त्वमूलकं तुलनात्मकमालोचनम्

## विश्वजित् राज

सृष्टेरादिकालतो वर्तमानकालपर्यन्तं वहून् जीवान् वहून् धर्मान् वहूः संस्कृतीः एषा धरित्रीमाता धारयति वहति च। एतस्याः मातुः स्थान–काल–परिवेशगतवैचित्रेण प्रभावितं जातं मनुष्यचिन्ताजगत्। प्रकृत्या विचित्राः शक्तीस्तासामाश्चर्यजनकं परिवर्त्तनं च दृष्ट्वा मनुष्यमनसि विस्मयो भयं च जायेते। तदैव स्वभावानुमानेन परिदृश्यमानजगतो वहिः स्थितायाः कस्याचित् अदृश्यमहाशक्त्युपस्थितिरनुभूयते मनुष्यमनसि; यया महाशक्त्या एव मनुष्याणां भयकारणस्वरूपाः दृश्यमानशक्तयः परिचालिता जाताः। अतो विस्मयः ("Wonder is the parent of Philosophy"[1] & Plato); संशयः; ज्ञानतृष्णा; वर्तमानावस्थां प्रत्यसन्तोषश्च – एते चत्वारः अनुभवा एव सम्मिलितरूपेण जनयति दार्शनिकचिन्ताम्। पेरी इति महोदयेनोक्तम् – "Philosophy is neither accidental, nor supernatural but inevitable and normal"[2]. विस्मयादिना कारणचतुष्टयेण जातो दर्शनबृक्षो भारतभूखण्डे सनातनब्राह्मणधर्मस्य मूलाधारोपरि एव द्रुतं वर्ध्यते। फलेन च पुष्पेण च सो बृक्षो ततोधिको विकाशो लभते। परन्तु ब्राह्मण्यधर्मस्य ब्राह्मण्यदर्शनस्य चात्यधिका विस्तृतिर्मनुष्यसमाजे विभेदमुत्पादयित्वा अराजकतां जनयति। मनुष्यसमाज एव ब्राह्मणानामुपार्जनक्षेत्ररूपेण शासनक्षेत्ररूपेण च परिणतो जातः। तदा ब्राह्मणकौशलात् मनुष्यान् रक्षयित्वा अस्य जगतः प्रकृतस्वरूपोद्धाटनाय मनुष्यान् सुखानन्दलाभोपायविधानाय च सुखवादस्य भोगवादस्य वस्तुवादस्य लोकायतदर्शनस्य वा उत्पत्तिर्भूयते स्म। पक्षान्तरे समाजे सर्वेषां मपुष्याणां साम्याधिकारस्थापनाय जागतिकदुःखदूरीकरणेन पारमार्थिकशान्तिविधानाय च बौद्धधर्मस्य बौद्धदर्शनस्य चोत्पत्तिर्भूयेते स्म।

सहोदरवत् उभयोर्दर्शनयोरुत्पत्तिः। यतो हि वैदिकक्रीयाप्रधानं कुसंस्कारमयमन्धविश्वासाच्छन्नमन्तसारशून्यं तथा ब्राह्मणकौशलेन सम्मोहितसमाजं साम्य–मैत्री–स्वाधीनतारूपाणां त्रिदण्डोपरि स्थापनप्रचेष्टत एव उभयोर्दर्शनयोरुत्पत्तिः। उत्पत्त्यनन्तरं प्रायः समलक्ष्यस्य भिन्नपथिकरूपेण ते आत्मप्रकाशं कुरुतः स्म। अद्वैतसत्योपलब्ध्याः पार्थक्यवशात् तस्मिन् सत्यारोहणाय भिन्नमार्गचिन्तनवशाच्च विविधा दार्शनिकचिन्ता विशेषस्फटिकाभ्यन्तरतो (Prism) विच्छुरिताः सप्तवर्णविशिष्टसूर्यकिरणवदात्मनः प्रकाशयन्ति। एतादृशरूपेण समचिन्तनस्याद्वितीयप्रकाशं भूत्वापि वस्तुवादिनस्तथा सुखवादिनश्चार्वाकस्य शून्यवादिनस्तथा दुःखवादिनो बौद्धदर्शनस्य च तत्त्वमूलकालोचनायां वहूविधानि पार्थक्यानि लक्ष्यन्ते।

सुखप्राप्तिरेव चार्वाकदर्शनस्य लक्ष्यं दुःखनिवृत्तिरेव बौद्धदर्शनस्य लक्ष्यम्। परन्तु सुखप्राप्तिर्दुखनिवृत्तिश्चेति पदद्वयं प्रायः समार्थस्य भिन्नशाब्दिकप्रकाशः। जगति सुखं दुखं च मिश्रितरूपेण विद्येते; अनिवार्यरूपेण प्राप्तं तत् दुःखं यथायथरूपेण परित्यज्य सुखाहरणमेवास्माकं जीवनस्यैकमेवाद्वितीयलक्ष्यं भवेदिति चार्वाका मन्यन्ते – "त्याज्यं सुखं विषयजन्म पुंसां दुःखोपसृष्टमिति मुर्खविचारणैषा।३[3] पक्षान्तरे भगवतो बुद्धस्य वचनम् – ३सर्वं दुःखं दुःखम्।"[4] इहजगति सर्ववस्तुषु सर्वक्षेत्रेषु दुःखमेव विद्यते। नास्ति कुत्रापि शाश्वतसुखम्। ततो हि अस्मिन् दुःखमये जगति सुखान्वेषणमस्मान् सुखशून्ये दुःखसागरे निक्षिप्य जीवनं दहति। अतः सुखसन्धानी भूत्वा दुःखप्राप्त्यपेक्षा दुःखनिवृत्तिमार्गानुसन्धानमेवाधिकं श्रेयः। एतया सुखलिप्सया चार्वाकजीवनदर्शनं भोगवादरूपेण परिचीयते। पक्षान्तरे दुःखनिवृत्तीच्छया बौद्धजीवनदर्शनं त्यागवादरूपेण परिगण्यते। परन्तु उभयोरेव एकमेवाद्वितीयलक्ष्यं शान्तिलाभ आनन्दलाभो वेति। चार्वाका भोगेनैव एतमानन्दं लिप्सन्ते; बुद्धमार्गानुसारिणस्त्यागेनैव हि एतमानन्दमीप्सन्ति। अतः सुखप्राप्तिप्रचेष्टया दुखःनिवृत्तिप्रचेष्टया चोभयोर्दर्शनयोर्मध्ये तात्त्विकविचारे नीतिविधाने जीवनशैलीनिर्णये च वहुविधाः भिन्नताः दृश्यन्ते।

सुखप्राप्तिरेव मुख्योविषयत्वात् चार्वाकदर्शनं दशेन्द्रियैः मनसा च दृश्यमानवस्तुजगतं प्रत्यत्यन्तासक्तं भूत्वा वस्तुवादस्य जयगीतिं गायति। चार्वाकमते पार्थिवजगदेव सर्वम्। चार्वाकदर्शनं वास्तवजगति विश्वसिति; वर्तमानकाले विश्वसिति। आगामीकालस्योत्कृष्टतरसुखलाभाय वर्तमानकालस्य स्वल्पसुखमेव

तेन न परित्यजते। इहजगदतिरिक्तजगतं तेन न स्वीक्रियते; पार्थिववस्त्वतिरिक्तमात्मतत्त्वमपि चार्वाकेन न गृहयते। स्वभावजातं रासायनिकप्रक्रियोद्भूतं चैतन्यमेका शक्तिरिव (प्राणिविज्ञानिनः अपि प्राणोत्पत्तिविषये एतादृशमतमेव प्रयच्छन्ति) – "तेभ्यश्चैतन्यम्"; शकिण्वादिभ्य मदशक्तिवत्"[5]। तत्र बौद्धदर्शनं बुद्ध्या परिदृष्यमानजगतं प्रति दशेन्द्रियाणि मनसं च निष्पन्दानि निस्पृहानि च कृत्वा सर्वक्षणिकवादं शून्यवादं वा स्तौति। बौद्धमते प्रत्येकं वस्तूत्पत्तिक्षणे एव विनष्टं जायते; ततो हि नववस्तुन्युत्पद्यन्ते। बौद्धदर्शने एतस्य क्षणभङ्गुरवादस्यान्तिमा परिणतिरेव शून्यवादः। सर्वदर्शनसंग्रहे माधवाचार्येणोक्तम् – "अतस्तत्त्वं सदसदुभयानुभयात्मकचतुष्कोटिविनिर्मुक्तं शून्यमेव"[6]। अस्य शून्यवादस्य व्याख्याप्रसङ्गे अभ्यङ्कर इति महोदयेनोक्तं – "कारकाद्यन्वितक्रियायां नञर्थान्वयेन कारकाद्यन्वितक्रियाया निषेधो नञा वोध्यत इति दर्शनक्रिया तत्कर्ता द्रष्टा तत्कर्मादिकं दृश्यं च निषिद्धं भवति"[7]। अनेन प्रकारेण बौद्धदर्शने परिदृश्यमानजगतो वास्तविकसत्तापि नाङगीक्रियते। ते क्षणिकचिन्तनेन शून्यचिन्तनेन च मनसो वस्तुजगत्लिप्सां दूरीकर्तुं सदासचेष्टाः।

चार्वाकदर्शनस्य सुखवादः सर्वदैव मनुष्यान् भोक्तुमुपदिशति। परलोकवादं खण्डनेन इहजगत्प्राधान्यत्वात् इहजीवन्प्राधान्यत्वाच्च वस्तुभोग एव तेषामेकमेव लक्ष्यम् – "यावत् जीवेत् सुखं जीवेत्"[8]। अत्र सुखमिति शब्देन वस्तुभोगेन इन्द्रियतृप्तिरेव बोध्यते। चार्वाकदर्शने "काम एव एकः पुरुषार्थः"[9]। पक्षान्तरे बौद्धदर्शनं सम्पूर्णेनैव भिन्नपथः पथिकम्। तत्र जगतः सर्वमेव दुःखमयम्। एतस्मात् दुःखमयजगतो निष्कृतिरेव बौद्धदर्शनस्यैकमेव लक्ष्यम्। वस्तुभोगेच्छावशादेव हि कर्मप्रवृत्तिः, कर्मप्रवृत्तिवशादेव हि संसारबन्धनम्, तस्मादेव हि दुःखप्राप्तिः। ततो हि भगवतो बुद्धस्यैकमेव लक्ष्यमासीत् – सर्वसमक्षे एतज्जागतिकदुःखमुपस्थाप्य मनुष्यान् त्यागतार्गपथिककरणम्।

इहजगत्प्राधान्यत्वात् परलोकनिराकरणत्वाच्च चार्वाकदर्शने इन्द्रियग्राहयतैवास्तित्वस्य मूलाधाररूपेण गण्यते। ब्राहमणैः सम्मोहितधर्मभीतमनुष्यान् मुक्तकरणाय चार्वाकदर्शनं प्रत्यक्षैकप्रमाणरूपेण गृहीत्वाप्रत्यक्षे परलोकवादे कर्मवादे च कुठाराघातं विधायति। चार्वाकमतप्रवर्तकेन बृहस्पतिनोक्तम् – "प्रत्यक्षमेव प्रमाणम्", श्नानुमानं प्रमाणम्"[10]। तन्मते वेदादीनि शास्त्राण्यपि ब्राहमणानां स्वार्थसिद्धेरुपायमात्रम् – "अप्रमाणं शब्दः"[11]। यद्यपि वेदप्रमाणविषये बौद्धदार्शनिकानामप्युद्देश्यं तद्रुपमेव तथापि जागतिककार्यसिद्धेर्दुःखाक्लिष्टजगत्प्रवृत्तेश्च कारणरूपेण कर्मवादस्य प्राधान्यप्रतिष्ठाय प्रत्यक्षेण सहानुमानमपि यथार्थप्रमाणरूपेण स्वीकियते –

> **"कार्यकारणभावाद्वा स्वभावाद्वा नियामकात्।**
> **अविनाभाव नियमः अदर्शनान्न न दर्शनात्"[12]।।**

सुखलाभस्य दुःखत्यागस्य च भिन्नपन्थाचिन्तनत्वात् कर्मवादविषये बौद्धदर्शने चार्वाकदर्शने च वहुविधानि पार्थक्यानि लक्ष्यन्ते। चार्वाकाः दृश्यमानजगतं प्रत्यस्थाशीलाः। ततश्चार्वाका इहजागतिककर्मणैव हि वर्तमानजीवने उन्नितिविधानं कर्तुं वस्तुसुखभोगं च प्राप्तुमिच्छन्ति –

> **"कृषिगोरक्षवाणिज्यदण्डनित्यादिभिर्वुधः।**
> **दृष्टैरेव सदोपायैर्भोगानुभवेद्भुवि"[13]।।**

सुखवादिनां चार्वाकानां सुखप्राप्त्युपायरूपाणि दण्डनीति–वाणिज्य–गोपालन–कृषिकर्मादीनि उपदेशवाक्यानि मनुष्याणामिहजागतिकोन्नतिविधाने तथा मानवसभ्यतामस्यां पृथिव्यां यथायथरूपेण धारणे वहने च सहायतां कुर्वन्ति। यतो हि ते मन्यन्ते– "भष्मीभूतस्य देहस्य पुनरागमनं कुतः"[14]? परन्तु बौद्धदर्शनं सर्वेषु पार्थिववस्तुषु दुःखदर्शनं कृत्वा सर्ववस्तुनो वैराग्यमिच्छति। त्यागेन सन्न्यासग्रहणेन समाधिधारणेन च जागतिकवस्तुभोगस्पृहाया मनसो मुक्तिरेव तेषां मुख्योद्देश्यम्। ततो हि बौद्धदर्शनं भाववादस्य तथाशून्यवादस्य जयगाथां गीत्वा मानवसभ्यताया धारणे रक्षणे उन्नतिविधाने च सदैव निस्पृहं वर्तते। वस्तुतश्चार्वाककर्मवाद इहजगत्मूलको वर्तमानकेन्द्रिकश्च। पक्षान्तरे मृत्यवनन्तरलोकस्य परजन्मनश्च चिन्तया पल्लवितः बौद्धकर्मवादः।

सुखाधारे प्रतिष्ठितस्य चार्वाकदर्शनस्य, दुःखाधारे प्रतिष्ठितस्य बौद्धदर्शनस्य च चिन्तामूलकं कर्ममूलकं वा पार्थक्यमुभयोदर्शनयोः जीवनशैलीनिर्णये नैतिकताविधाने च अनेकानि पार्थक्यानि सूचयति। अदृष्टवादस्यास्वीकृतित्वात् चार्वाकदर्शने चरित्रदृढ़ताया मानविकमूल्यवोधस्य च नास्ति स्थानम् –

> **"सुकृते वः कथं श्रद्धा सुरते च कथं न सा।**
> **तत् कर्म पुरुष कुर्याद् येनान्ते सुखमेधते।।**
> **वलात् कुरुत पापानि सन्तु तान्यकृतानि वः।**
> **सर्वान् वलकृतान् दोषानकृतान् मनुरब्रवीत्"[15]।।**

येन तेन प्रकारेण भोगः एव यत्रैकमेवाद्वितीयं लक्ष्यं, तत्र नैतिकता केन प्रकारेणात्मानं प्रस्फुटिता पल्लविता च कर्तुं शक्यते? चार्वाकदर्शने उक्तम् – "शृङ्गारवेशं कुर्याद्", "अक्षैर्दीव्यात्", "नैव दीव्याच्च", "आसवानि सेवयेत्", "मांसानि च", "मत्तकाशिन्यः सेव्याः", "दिव्यप्रमदादर्शनं च", "नेत्रादर्शनं च", "आदर्शदर्शनं च", "तम्बुलचर्वनं च"[16]। किन्तु बौद्धदर्शने सतता नियमानुवर्तिता चरित्रस्य दृढ़ता तनसो निर्मलता समाजस्य शृङ्खला च सर्वोपरि स्थाने वर्तन्ते। एतस्य स्पष्टप्रमाणं – भगवता बुद्धेन दुःखत्यागस्योपायस्वरूपमष्टाङ्गिकमार्गनिर्देशनम् – सम्यक् दृष्टिः (जीवनविषयकं जगत्विषयकं च यर्थार्थज्ञानं तत्त्वज्ञानं वा), सम्यक् संकल्पः (क्रियायम्पादने मनसो दृढोद्यमः), सम्यक् वाक् (सत्यं वचनम्), सम्यक् कर्मान्तः (यथायथमाचरणम् – अहिंसा, अस्तेयः, ब्रीहमचर्यं सत्यपालनं मादकवर्जनं च), सम्यकाजीव (महती जीविका), सम्यक् व्यायामः (यथायथरूपेणाङ्गसञ्चालनम्), सम्यक् स्मृतिः (पूर्वलब्धस्य सदसद्ज्ञानस्य मनसि पुनरुद्रेकम्), सम्यक् समाधिश्च (यथार्थतत्त्वे सम्चूर्णरूपेण मनोनिवेशनम्)। बौद्धदर्शनानुसारेणाष्टाङ्गिकमार्गानुशीलनेन शरीरस्य मनसश्च निर्मलतायां जाते मनुष्यः यर्थाथज्ञानलाभस्य निर्वानलाभस्य चाधिकारी भवति। अतो दुखःनिवृत्तये जीवनस्य प्रत्येकं क्षेत्रं सतता परिपूर्णकरणस्य शिक्षा एव बौद्धनीतिशिक्षाया मूलम्। इहजीवनप्राधान्यत्वात् प्रत्यक्ष्यजगत्प्राधान्यत्वाच्च चार्वाकदर्शने मृत्युरेव हि मनुष्याणां मुक्तिः – "देहोच्छेदो मोक्षः"[17]। पक्षान्तरे पुनर्जन्मवादेबौद्धदर्शनस्योपदेशः – कर्मफलक्षयेण सर्वदुःखातिक्रम्य यथार्थज्ञानलाभेन प्राप्तं निर्वाणमेव मनुष्याणां मुक्तिमीक्षो वा।

परिशेषे एतद्वक्तुं शक्यते, चार्वाकदर्शनं बौद्धदर्शनं च भिन्नमार्गप्रदर्शकौ भूत्वापि तयोरुत्पत्तिकारणमन्तिमलक्ष्यं च एकमेवाद्वितीयम्। सुखलाभेन दुःखत्यागेन चानन्दाहरणमेव तयोर्मुख्योद्देश्यम्।

## ग्रन्थमूलकानि तथ्यसूत्राणि


1. सामन्त, विमलेन्दु, 'दर्शन परिचय', छाया प्रकाशनी, कलकाता, 2014, *loc. Cit.* p.1
2. बन्दोपाध्याय, श्यामलकृष्ण, 'दर्शन प्रवेशिका', क्यालकाटा वुक हाउस, कलकाता, 2001, *loc. Cit.* p.7
3. चार्वाकषष्टिः 59, भट्टाचार्य, अमित (सम्पादितम्), 'चार्वाकदर्शन', संस्कृत पुस्तक भाण्डार, कलकाता, 1415 वङ्गाब्दः (द्वितीयम् संस्करणम्), पृ. 97
4. भट्टाचार्य, अमित (सम्पादितम्), 'सर्वदर्शनसंग्रह', संस्कृत पुस्तक भाण्डार, कलकाता, 2013, पृ.24
5. वार्हस्पत्यसूत्रम् 3–4 भट्टाचार्य, अमित (सम्पादितम्), 'चार्वाकदर्शन', संस्कृत पुस्तक भाण्डार, कलकाता, 1415 वङ्गाब्दः (द्वितीयम् संस्करणम्), पृ. 68
6. भट्टाचार्य, अमित (सम्पादितम्), 'चार्वाक–बौद्ध–जैनदर्शन', संस्कृत पुस्तक भाण्डार, कलकाता, 2013, पृ. 81

7. *i.bid.* p. 79
8. वार्हस्पत्यसूत्रम् 45, शास्त्री, दक्षिणारञ्जन (सम्पादितम्), 'चार्वाकदर्शन', पः वः राज्य पुस्तक पर्षत्, कलकाता, 2013 (चतुर्थम् संस्करणम्), पृ. 188
9. वार्हस्पत्यसूत्रम् 50, शास्त्री, दक्षिणारञ्जन (सम्पादितम्), 'चार्वाकदर्शन', पः वः राज्य पुस्तक पर्षत्, कलकाता, 2013 (चतुर्थम् संस्करणम्), पृ. 187
10. वार्हस्पत्यसूत्रम् 70–71, भट्टाचार्य, अमित (सम्पादितम्), 'चार्वाकदर्शन', संस्कृत पुस्तक भाण्डार, कलकाता, 1415 वङ्गाब्दः (द्वितीयम् संस्करणम्), पृ. 92
11. वार्हस्पत्यसूत्रम् 74, भट्टाचार्य, अमित (सम्पादितम्), 'चार्वाकदर्शन', संस्कृत पुस्तक भाण्डार, कलकाता, 1415 वङ्गाब्दः (द्वितीयम् संस्करणम्), पृ. 92
12. भट्टाचार्य, अमित (सम्पादितम्), 'चार्वाक–बौद्ध–जैनदर्शन', संस्कृत पुस्तक भाण्डार, कलकाता, 2013, पृ. 1
13. सर्वसिद्धान्तसंग्रहे लोकायतिकपक्षप्रकरणम् – 15
14. वार्हस्पत्यसूत्रम् 45, शास्त्री, दक्षिणारञ्जन (सम्पादितम्), 'चार्वाकदर्शन', पः वः राज्य पुस्तक पर्षत्, कलकाता, 2013 (चतुर्थम् संस्करणम्), पृ. 188
15. चार्वाकषष्टिः 12–13, भट्टाचार्य, अमित (सम्पादितम्), 'चार्वाकदर्शन', संस्कृत पुस्तक भाण्डार, कलकाता, 1415 वङ्गाब्दः (द्वितीयम् संस्करणम्), पृ. 94–95
16. वार्हस्पत्यसूत्रम् 21–30, भट्टाचार्य, अमित (सम्पादितम्), 'चार्वाकदर्शन', संस्कृत पुस्तक भाण्डार, कलकाता, 1415 वङ्गाब्दः (द्वितीयम् संस्करणम्), पृ. 90
17. वार्हस्पत्यसूत्रम् 96, भट्टाचार्य, अमित (सम्पादितम्), 'चार्वाकदर्शन', संस्कृत पुस्तक भाण्डार, कलकाता, 1415 वङ्गाब्दः (द्वितीयम् संस्करणम्), पृ. 93